# Vanigitam

# वाणीगीतम्

## Document Information

Text title : Vani Gitam

File name : vANIgItam.itx

Category : devii, sarasvatI, devI

Location : doc_devii

Transliterated by : staff of Muktabodha.org Mark S.G. Dyczkowski

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : rudrayAmale uttaratantre 2 bhairava bhairavI sa.nvAde

Source : Rudrayamalam part 2 edited by Ram Prasad Tripathi and Sudhakar Malaviya

Acknowledge-Permission: Marjorie Woollacott, Ph.D., Digital Library Coordinator muktabodha.org

Latest update : February 16, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 16, 2020

*sanskritdocuments.org*

# वाणीगीतम्

अथ त्रिसप्ततितमः पटलः
श्रूयतां कोमलाम्भोजस्थितवक्त्रविराजिते ।
अत्यद्भुतं महागीतं शृणोति साधको हि यत् ॥ ७३-१ ॥

ध्वनिरन्तर्गतं ज्योतिर्ज्योतिरन्तर्गतं मनः ।
तन्मनो विलयं याति ध्वनिषु ज्ञानकोटिषु ॥ ७३-२ ॥

तद् ध्वनिज्ञानसंज्ञानं शृण्वन्ति योगिनो जनाः ॥ ७३-३ ॥

परमगुणगभीरे धीरनीरे शरीरे
भवनवभवकान्तौ संप्रशात्मा नितान्तम् ।
विमलमधुरवाक्यालङ्कृतज्ञानसिन्धौ
सकलवचनरत्नं स्थापयामास वाणी ॥ ७३-४ ॥

ॐ तुण्डोग्रस्थिरवचनगा मोहयज्जीववर्णं
शङ्कातङ्कारहितचरिता मोहिता ज्ञानतन्द्रे ।
सालङ्कारा खरतरकरा वाक्यमालां वहन्ती
सा पश्यन्ती विमलकरुणा राध्यतां मूलचक्रे ॥ ७३-५ ॥

संसारे सारभागे सयुवतिसुकृपालक्षणैर्लक्षिताङ्गे
सिद्धान्तज्ञानजीवं चरमसमगुणं भूपतेर्योगिनो वा ।
विप्रेन्द्राणामनन्तं ध्वनिगुरुमधुरं व्यापितं पार्वतीशे
हे हे कालप्रकालप्रियतनुशिखरे वेशमासं चयत्वम् ॥ ७३-६ ॥

सञ्चारे परमस्थिरे हरिहरे विद्याधरे भूधरे
साकारे करुणाकरे स्वविलये ते पादपङ्केरुहे ।
नित्यज्ञानमयं जयं सुरतरुच्छायालयं पूजये
मातः कालि कलाधरे गलबिले शाकम्भरि शाकिनि ॥ ७३-७ ॥

भास्वत्कोटिरविच्छटाभरसुखश्रीकण्ठवीरालये

हृत्पङ्केरुहमध्यसारघटितं सारस्वतोत्पत्तिदम् ।
श्रीदेवीगुरुरूपिणीचरणपद्मान्तःप्रभामण्डलं
शैलेन्द्रोदयकारिणीमणिगृहं मापद्मनाभेरधः ॥ ७३-८॥

वाञ्छाकल्पद्रुमस्था स्थितिलयफलदा योगिनी योगमाता
सूक्ष्मानन्दप्रशंसा तरुणरविकला कोकिलालापमुग्धा ।
स्निग्धा स्निग्धाङ्गसङ्गा नवशशिमुकुटा चारुवर्णा विशाला
सा दुर्गा दुःखहन्त्री भवतु शिवगृहे कामनासिद्धिदात्री ॥ ७३-९॥

निराश्रयमहं पदं भवति कालि भक्त्याश्रये
    श्रिये विमलभावदे सकलभावगो गोगणः ।
मयि प्रियधनं मुदा वितर चारुदृष्ट्या सुखं
    तदैव गलभागकृद्गगनपद्ममध्यस्थले ॥ ७३-१०॥

नित्ये निष्फलरूपभूतिनिकरे त्रैलोक्यरक्षाकरे
    धर्मध्वान्तनिकेतने गणयति ज्ञानप्रयोगान्तरम् ।
ते पादाम्बुजसम्भवः प्रियगणः प्राणाश्रितः पार्थिवो
    मातः पर्वतराजराजदुहिते पुण्यं पवित्राप्तये ॥ ७३-११॥

भीभर्गो भारसर्गो भवरवविभवो भूतिभारावलम्बी
भावाभावः प्रभावः प्रभवति भुवने भीमभक्तिप्रकाशः ।
भूभूतोद्भूतभीतिप्रभृतिभयभवासम्भवानन्दभावो
मातस्ते पादपङ्केरुहविमलतलानन्दसेवाभिवृद्ध्या ॥ ७३-१२॥

नित्यं पातु गणेश्वरी गणपतेर्माता रमे मातरं
प्राणं प्रत्यय पूर्वसिद्धिकरणी सिद्धासने रक्षतु ।
आनन्दाम्बुधिमज्जनैकसुखदा भालस्थलस्थापिनी
कण्ठाम्भोरुहकर्णिका सुरगणान् गीता परा सुस्वरान् ॥ ७३-१३॥

कृपापारावारा विमलपुरुषं गौरिवपुषं
    धरावक्षे मुख्ये धरणिसुतबुद्ध्याऽधमनरम् ।
न जाने त्वत्कामं तनुविरहचिन्तामणिमयं
    तव स्नेहाध्वीनां गमयति न पारं सुरवरः ॥ ७३-१४॥

जयति जय जयाज्योतिराधारजेता
    सुरनरगणपूज्यः खेटचक्रस्य मध्ये ।
भवकमलकराढ्यं नम्रभावं प्रतापं

गमयति तव पादाम्भोजसेवाबलेन ॥ ७३-१५॥

इत्येतैः श्लोकमुख्यैस्तु स्तुत्वा गीतरसान्तरैः ।
परब्रह्ममयीं ध्यात्वा स्वयं ब्रह्मतनुं गतः ॥ ७३-१६॥

अकस्माद् भोगसम्पत्तिर्मोक्षपद्धतयः शुभाः ।
प्रभवन्ति स्वयं विद्या अष्टादश गुणोदयाः ॥ ७३-१७॥

नीलजीमूतसङ्काशं चन्द्रशेखरमीश्वरम् ।
सदाशिवं महाशक्तिशाकिनीवामसंस्थितम् ॥ ७३-१८॥

चतुर्भुजं देवदेवमनन्तमक्षरं हरम् ।
भावगीतं पुनर्गीत्वा परं ब्रह्मसमो भवेत् ॥ ७३-१९॥

कण्ठषोडशसम्पूर्णमध्ये योगी स्थिराशयः ।
अष्टसिद्धीश्वरो भूत्वा भावसिद्धिं लभेद् ध्रुवम् ॥ ७३-२०॥

त्वया सह समाह्लाददर्शनं सिद्धिमाप्नुयात् ॥ ७३-२१॥

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे वाणीगीतविन्यासो नाम त्रिसप्ततितमः पटलः ॥ ७३॥

The numbers correspond to paTala and verse numbers from Rudrayamala uttaratantra.

Proofread by Aruna Narayanan

*Vanigitam*

pdf was typeset on February 16, 2020

Please send corrections to *sanskrit@cheerful.com*